संस्कृत पत्रिका | संकलन 2|जुलाई – दिसंबर -2020



# चिन्मय निर्झरिणी

**विशेषप्रस्तुतिः**

**साक्षात्कारः**

**श्रीमती बी.महाराज कुमारी**

**(भू.पू.शि.)**

**चिन्मयविधालयः , बोकारो, झारखण्डः**



*Painting by Prayag, a student of Chinmaya International Residential School.

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ।।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन, तस्मै श्रीगुरवे नमः ।।

# शुभसंदेश:



**श्रीमान् महेश त्रिपाठी,सचिव:**

महत् हर्षस्य विषय: अयं यत् निर्झरिणी पत्रिकाया: द्वितीयं अङ्कं प्रकाशित: भवति। "सर्वासु मधुरा भाषा दिव्या गीर्वाण भारती " इति भावं प्रदर्शयति प्रकाशयति च एषा पत्रिका। एतत् मम विश्वासं यत् एषा पत्रिका श्रेष्ठगुरुजनानां बौद्धिक प्रकर्षस्य संकलनं वर्तते। तस्मात् कारणात् निश्चयेन सुधीपाठक: तथा छात्र छात्राणां कृते लाभप्रदं भविष्यति। नूतनशब्दानाम् अभ्यासं तु भविष्यति एव सहैव सरल माध्यमेन भाषाया: विकासं अपि भविष्यति। यदा सुधी पाठकानां किञ्चिदपि ज्ञानवर्धनं तथा संस्कृतभाषाया: प्रति रुचि: भविष्यति तदा पत्रिकाया: प्रयोजनं सफली भूतं भविष्यति इति मन्ये।

पत्रिकाया: द्वितीयं अंकस्य प्रकाशनार्थं अहम् सम्पादनमण्डलस्य सदस्यानां तथा च विद्यालय परिवारस्य हार्दा: कृतज्ञतां शुभकामनां ज्ञापयामि।

धन्यवाद:

# संपादकीय:

साहित्य समाजस्य दर्पणम् अस्ति। संस्कृताभिवृद्धि: यदि अपेक्ष्यते तर्हि संस्कृतक्षेत्रे अपि आधुनिकं सर्जनात्मकं साहित्यं अधिकतया सृष्टं भवेत् इति विषयं तु प्राय: अङ्गीकुर्वन्ति। एतया दृष्ट्या बहुविधा: प्रयत्न: सर्वत्र प्रचलन्त: सन्ति अपि। एतत् काले अस्माभि: एतदपि चिन्तनीयं यत् सृज्यमानं साहित्यं कालोचितम् अस्ति न वा।

प्रवाहमान निर्झरिणी ज्ञान सरिताया: एष: द्वितीय संस्करणं अस्ति। एषा पत्रिका छात्राणां शिक्षकानां तथा सामान्य जनानाम् कृते अपि लाभप्रदं वर्तते। पत्रिकाया: नामैव पत्रिकाया: सार्थकता सिद्धयति। शिक्षकाणां ज्ञानवर्धकं व्याख्यानं चिन्तनं छात्राणां नैतिक मूल्यानां वर्धापनम् करिष्यति। मानव जीवनस्य दैनिक प्रयोगस्य कृते आवश्यक वस्तूनां यथा वर्णज्ञानम्,भारतीय संस्कारानां चित्रमाध्यमेन परिचयं , क्रियापदानां चित्रमाध्यमेन परिचयं संस्कृत छात्राणां शब्दसामर्थ्यं वर्धयिष्यति। पत्रिकाया: सफलताया: दायित्वं सुधी पाठकानां उपरि भवति। भवन्त: निश्चयेन पत्रिकाया: सम्यक् मूल्याङ्कनं कृत्वा विविधपक्षानां उपरि सम्पादकमण्डलस्य मार्गदर्शनं करिष्यन्ति। मम एष: विश्वास: यत् पत्रिकाया: विषयवस्तु: भवत: कृते लाभप्रदं ज्ञानप्रदं च कल्याणकरं अपि भविष्यति।

पत्रिकाया: सफल प्रकाशनार्थं सम्पादकमण्डलस्य सदस्यानां तथा तकनीकी सहायकानां प्रति अहं कृतज्ञतां ज्ञापयामि शुभकामनं विनिवेदयामि।

धन्यवाद:


## संपादकमण्डलस्य सदस्या:

1.श्रीमती पूजा सिंह

2. श्री गोपाल कृष्ण दूबे

## संपादनसहयोगिन:

1. श्री बीरेंद्र कुमार श्रीवास्तव

2.श्रीमती बी.महाराजकुमारी(भू.पू.शि.)

3.श्रीमती तिलोत्तमा कोचगवे

## आवरणसज्जक:

1. श्री शुभेंदु मिश्रा



## प्रकाशक:

संस्कृतविभाग:,चिन्मयविद्यालय:,

बोकारो, झारखण्ड:



## अणुसङ्केतम्

cvsanskritemagazine

@gmail.com

# अनुक्रमणिका


| | | |
|---|---|---|
| साक्षात्कार: | श्रीमती बी.महाराज कुमारी(भू.पू.शि.) | ६ |
| लेखा: | | ७-१२ |
| भक्ति-साधना | श्रीमती तिलोत्तमा कोचगवे | ८ |
| महर्षि: पाणिनि: | श्री उदितपाण्डेय: | ९ |
| शरीरमाद्यं खलु धर्मसाधनम् | सुश्री पुजा पाण्डेय: | १० |
| हे!भारत देश | श्रीमती पूजा सिंह: | ११ |
| गुरुशुश्रुषया विद्या | श्री गोपाल कृष्ण दूबे | १२ |
| बालरचना: | | १३-१८ |
| अस्माकं देश: | अनन्या कुमारी,9C | १४ |
| मम ग्राम: | अनीशा मंडल, 9E | १५ |
| पर्यावरणम् | निमिषा मिश्रा,9C | १५ |
| अनुशासनम् | श्रीमयी,9F | १६ |
| वृक्षं विना जीवनं न | सुहानी सिंह,7A | १६ |
| संस्कृतभाषाया: महत्वम् | खुशी किरण,8A | १६ |
| हस्तरचना: | | १७,१८ |
| बालप्रमोदिनी | | १९-२५ |
| शब्दज्ञानम् | | २० |
| वर्णज्ञानम् | | २१ |
| क्रियापदज्ञानम् | | २२ |
| गृहस्यवस्तूनि | | २३ |
| शरीराङ्गानि | | २४ |
| भारतीयसंस्कारा: | | २५ |
| कुतुककुटी | | २६-३० |
| परसरणम् | | २७ |
| प्रकाशस्य गति: | | २८ |
| मार्गं दर्शयतु | | २९ |
| चित्रम् : | आदित्य चक्रवर्ती,10A | ३० |
| चित्रावली | | ३१-३४ |
| संस्कृतविषये उत्कृष्ट: अङ्कार्जकानां छात्राणां सूची | | ३५ |
| अग्रिमाप्रते: मुखपृष्ठ: | | ३६ |



# साक्षात्कारः

## – श्रीमती बी.महाराज कुमारी (भू.पू.शि.)

**प्रश्न : भवत्या: परिचय: किञ्चित् वदतु?**

**उत्तर** : मम नाम बी. महाराज कुमारी।अहम् तु दक्षिण भारतीया: परंतु विवाहस्य पश्चात् अत्र आगच्छम्।मम पतिः अत्रैव कार्यं करोति स्म। अहमपि अत्रैव स्थित्वा स्व पाठनं पूर्ण अकरवम्।मम प्रारंभिकी शिक्षा पश्चिम बंगालत: तथा उत्तरोत्तरा शिक्षा आगरा नगरे अभवत्।

**प्रश्न : चिन्मयविद्यालये भवती कदा योगदानं दत्तवती?**

**उत्तर** : संस्कृत - अध्यापिकारुपेण १९९० तमे वर्षे अहम् आगतवती आसीत्।

**प्रश्न : सम्प्रति भवत्या: शैक्षिअनुभवं कति वर्षस्य अभवत्?**

**उत्तर** : अस्मिन् वर्षे तु अहं सेवानिवृत्ता । इदानीम् त्रिंशत्(३०) वर्षाणि अभवत्।

**प्रश्न : विद्यालयस्य विषये किञ्चित् वदतु?**

**उत्तर** : अयं विद्यालय: १९७७ तमे प्रारंभं अभवत्। इदानीम् अस्मिन् विद्यालये १४५ शिक्षका: , ६७ सहकर्मय: अपि सन्ति। आगामी समये विद्यालयः इतोपि उत्कृष्टं स्थानं प्राप्स्यति। शिक्षकाः शिक्षिकाः चापि विद्यालयं अधिकाधिकं अग्रे वार्धयन्ति।

**प्रश्न : संस्कृतं विषयं प्रति छात्राणां किं विचारं अस्ति?**

**उत्तर** : छात्रा: चिन्तयन्ति यत् संस्कृतं बहु क्लिष्टा भाषा अस्ति। मन: न रमते। परन्तु ते जानन्ति यत् अस्मिन् विषये अल्प-परिश्रमेण अधिकाधिकाः अंकाः प्राप्तुम् शक्यन्ते।

**प्रश्न : सेवानिवृत्ति समये शिक्षकानां कृते किम् संदेश: ?**

**उत्तर** : वरिष्ठशिक्षकै: सह नव शिक्षक - शिक्षिकाञ्च विद्यालयस्य परंपरां अग्रे वार्धयन्ति तथा छात्रेषु चिन्मय-परिवारस्य संस्काराणां वृद्धिं अपि कुर्वन्ति।

**प्रश्न : अस्याः पत्रिकायाः माध्यमेन भवती छात्रेभ्यः किं संदेशः दातुम् इच्छति?**

**उत्तर** : संस्कृतम् देवभाषा अस्ति, अस्यां एव भाषायां अस्माकं संस्कृतिः वर्णिता।अतएव इयं भाषा पठनीया। अपि च, अंकानाम् दृष्ट्या अपि संस्कृतं पठनीयम्।

**प्रश्न : किम् संस्कृत ई - पत्रिका छात्रेभ्य: लाभकारी अस्ति?**

**उत्तर** : अवश्यमेव।

**प्रश्न : वर्तमानसमये सर्वजनहिताय किम् ध्येयमंत्रं ?**

**उत्तर** : शरीरमाद्यं खलु धर्मसाधनम्।

# लेखा:





# भक्ति – साधना

– श्रीमती तिलोत्तमा कोचगवे
( शिक्षिका )

सम्पूर्णः – समर्पणम् एव भक्तिरुच्यते। शास्त्रानुसारेण आत्मा–परमात्मा मेलनं एव भक्ति –साधना उच्यते, किन्तु समर्पणं विना कोऽपि मेलनं न संभवति।तथापि प्रश्नः अस्ति यत् कं प्रति समर्पणं ? समर्थसत्तां प्रति।

इतोऽपि, भक्तिविषये अनेकाः परिभाषाः संभवति परम् तस्य पृष्ठे एकैव भावना भवति यत्वयं ईश्वरस्य आज्ञानुसारेण चलितुम् उद्यतः भवेम। यदा स्व जीवनस्य नीति–नियमं ईश्वरस्य इच्छानुसारेण कुर्मः तदैव ईश्वरस्य सद्भक्तेषु सम्मिलिताः भवामः।

भक्ति–साधनायां सर्वस्व सर्वशक्तिमन्तम् ईश्वरं प्रति समर्पणं आवश्यकम्।स्व–बुद्धिः, श्रमं , समयं, मनोयोगं – एते सर्वे ईश्वरस्य कार्याणि पूरयितुं भवन्तु। यदा स्वार्पितुं उद्यतः भवेम तदा ईश्वरोऽपि स्व सर्वस्य प्रदानं करोति।

ईश्वरस्य आशीर्वादं प्राप्तुम् प्रथमः बीजान् इव गलनं भविष्यति। ईश्वरस्य अनुदानं कदापि क्षीणं न भवति,परं अनुदानं प्राप्तुं समर्पणं केवलं समर्पणं आवश्यकम्।

**"यः गलयति स विकसति"**

'स्व'– इत्यस्य अर्पणस्य साधना एव भक्ति –साधना। उक्तम् अस्ति –

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।**
**यत्तप्स्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।**

वस्तुतः प्रेमःएव भक्तेः जननी अस्ति।प्रेमे आसक्तिः भवति परं भक्तौ प्रेम आसक्तेः रुपं त्यक्त्वा प्रीतेः रुपं धारयति,पुनःप्रीतेः रुपं त्यक्त्वा भक्तेः रुपं धारयति अतः प्रेमः एव उर्ध्वगामी भूत्वा भक्तेः उत्कृष्टं पवित्रं च रुपं प्राप्नोति।

यस्य हृदये भक्तेः कमलं विकसति सः सर्वगुणोपेतः पूर्णः आदर्शःच भवति।

अतः इदं रुपं आप्त्वा प्रेमः ज्ञानस्य वैराग्यस्य च दिव्यनेत्रेण सत्यं पश्यति,तदा प्रेमः आसक्त्याः मुक्तं भवति।

**कायेन वाचा मनसैन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।**
**करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि।।**

(आध्यात्मिकपत्रिकायाः अनुदितम्)



# महर्षिः पाणिनिः

- उदितपाण्डेयः

(शिक्षकः)

पाणिनिः संस्कृत-व्याकरणस्य महान् वैयाकरणः आसीत्। तस्य अष्टाध्यायी इति व्याकरणग्रन्थः विश्वप्रसिद्धः रचना वर्तते ।अस्य ग्रन्थस्य वैज्ञानिकतां दृष्ट्वा, विद्वांसः पाणिनिं 'महासङ्गणकः' इति नाम्नां विभूषयन्ति। महर्षिपाणिनेः जन्म क्रीस्तोः पूर्वं सप्तमशताब्द्यां अभवत् इति ऐतिहासिकाः प्रमाणयन्ति ।

पाणिनेः मातुः नाम "दाक्षि" अतः तस्य नाम दाक्षीपुत्रः अभवत् । तस्य पितुः नाम "पणिनः" अतः तस्य नाम पाणिनिः अभवत् ।तस्य जन्मस्थानं शलातुरग्रामः आसीत् अतः तस्य नामं "शालातुरीयः" इति प्रसिद्धं नाम अपि अस्ति । परन्तु पाणिनिः इति नाम सुप्रसिद्धं अस्ति ।आचार्य वर्षः पाणिनेः गुरूः आसीत्।

श्रूयते-बाल्यकाले पाणिनिः अतीव मन्दबुद्धिः आसीत् । सर्वे सहपाठिनः तं परिहसन्ति स्म। अध्ययनं महत् तपःभवति । अध्ययने असफलः सः दुखीः आसीत्। सः हिमालयं गतवान् ,तत्र गत्वा सः महत् तपः अकरोत्। तेन प्रसन्नः भगवान् शिवः तस्मै नूतनां व्याकरणप्रक्रियां प्रदत्तवान्।

एवं हि श्रूयते -

नृतावसाने नटराजराजो ननादढक्कां नवपञ्चवारम् ।

उद्धर्तुकामः सनकादि सिद्धा नेतद्विमर्शे शिवसूत्रजालम्।।

अइऊण् इत्यादीनि चतुर्दश सूत्राणि महेश्वर- प्रदत्तानि सन्ति अतः तानि "महेश्वरसूत्राणि" इति कथ्यन्ते।

पाणिनिः न केवलं महान् वैयाकरणः सः महान् कविः अपि आसीत्। "जम्बवतीविजयम्" इति पद्यमयी रचना वर्तते। इदं काव्यं न उपलभ्यते अधुना तथापि केचन श्लोकाः इतस्ततः उद्धृताः दृश्यन्ते । "पाणिनिसमो वैयाकरणः न भूतो न भविष्यति" इति।



# " शरीरमाद्यं खलु धर्म साधनम् "

- सुश्री पूजा पाण्डेयः
(शिक्षिका)

स्वस्थ शरीरे एवं स्वस्थ मस्तिष्कस्य निवासं भवति,एतत् कथनम् पूर्णतः सत्यं अस्ति। यस्य शरीरं स्वस्थं भविष्यति। तस्य आत्मोपि स्वस्थं समुन्नतं भविष्यति।स्वस्थं आत्मकृते शरीरस्य स्वस्थ भवितुम् आवश्यकम् अस्ति।

स्वस्थ आत्मायाः लक्षणं अस्ति - साहसं, शौर्यं ,धैर्यं ,शान्तिः, शीलं ,विनयं प्रसन्नता, असंकीर्णता आदि दैवी सात्विकी तथा च आध्यात्मिक गुणानां बाहुल्यं। एषु मानवेषु एषां गुणानां अभिव्यक्तिः भवति। तेषां आत्मा एवं स्वस्थः भवति इति वक्तुम् शक्नुमः। एतस्य विपरीतं ये का पुरुषः भवन्ति ते धैर्यविहीनः, भीरूः, दीन-हीनः, मलिनः सन्ति। तेषां आत्मा स्वस्थः निर्मातुं व स्वस्थ आत्मायाःप्राप्ति कृते एषां गुणानाम् आवश्यकता भवति तेषु प्रथमं स्थानम् स्वस्थः शरीरस्य एव भवति। शरीरम् यदा पूर्ण रुपेण स्वस्थम् भवति। तदा अंतः, बहिः सर्वत्र सामर्थं एव सामर्थ्यं दृष्टिगोचरम् भवति।

समाजस्य प्रत्येक क्षेत्रेषु स्वस्थ शरीरस्य अनिवार्य आवश्यकता भवति। उपार्जनात् नीत्वा भोजनपर्यन्त तथा संघर्षात् नीत्वा मनोरंजन पर्यन्तं एतादृशम् कोपि क्षेत्रं नास्ति एषां अस्वस्थ शरीर व्यक्तिः सफलता सार्थकता पूर्वकं ज्ञेतुं शक्नोति।कृषकः, कर्मकारः, अधिकारिणः, शिक्षकः, उद्योगपतिनाम् कृतेपि स्वस्थ शरीरस्य आवश्यकता निश्चयेन भवति।स्वास्थं एव महत्वपूर्णं अस्ति।

जीवने तर्हि स्वास्थं नाम् किम्?

"सामान्यतः साक्षात् स्वास्थ्य भावः स्वास्थयं"।

स्वस्थः कः?

स्वस्थिनः यः तिष्ठति सःस्वस्थः।

स्वस्थ्य शब्दस्य अर्थ इतोपि स्पष्टं कृतवान् अस्ति। आयासेन बिना सुखेन यः अवस्थित सः स्वस्थः।



# हे भारत देश

- श्रीमती पूजा सिंहः
(शिक्षिका)

जयतु जयतु हे भारत देश जयतु जयतु हे भारत देश।।
विश्वस्य प्राचीनतमः देशः,ज्ञानस्य धर्मस्य  जन्मभूमि।
अयं आर्याणां देशोऽस्ति ।।

जयतु जयतु हे भारत देश जयतु जयतु हे भारत देश।।
अनेके वेशाः अनेके प्रदेशाः,अनेके उत्सवाः अनेके भाषाः।
तायामपि एकतायाः सुमधुरा धारा

जयतु जयतु हे भारत देश जयतु जयतु हे भारत देश।।
अयं पृथिव्याः स्वर्गः अस्ति,अस्य मुकुटः हिमालयः अस्ति।
सागरः अस्यं चरणौ क्षालयति।।

जयतु जयतु हे भारत देश जयतु जयतु हे भारत देश।।



# गुरुशुश्रूषया विद्या

— गोपाल कृष्ण दूबे
(शिक्षक:)

अस्माकं जीवने विद्याया: स्थानं महत्त्वपूर्णं वर्तते। अस्या: विद्याया: प्राप्ति: गुरुणां कृपया एव जायते। एतदर्थं गुरव: सर्वदा समादरयोग्या: सन्ति।

प्राचीनसमये तु गुरूणां महत्वम् अत्यधिकम् आसीत्। तदा तु खलु गुरुरेव ब्रह्मा, गुरू: इव विष्णु:,महेश्वर: , परब्रह्म इति आसन् एषा जनानां बुद्धि: आसीत्। अतएव कथितम् -

**गुरुर्ब्रह्मा गुरुर्विष्णु:, गुरुर्देवो महेश्वर: ।**

**गुरु: साक्षात् परब्रह्म तस्मै, श्रीगुरुवे नम:।।**

गुरुरेव सद्विद्यां दत्त्वा तन्मार्गम् उपदिशति येन खलु कल्याणं भवति। तस्मादेव ज्ञानं लब्ध्वा जना: परं शान्तिं सुखं च लभन्ते। एषा खलु गुरो: कृपा अस्ति यत् मूर्खोपि पण्डित: , निर्धन: अपि धनी, पापी अपि पुण्यात्मा च जायते।धर्माचार्य: कथयन्ति यत्-

**एकमप्यक्षरं यस्तु गुरु: शिष्ये निवेदयेत्।**

**पृथिव्यां नास्ति तद्द्रव्यं यद् दत्त्वानृणी भवेत्।।**

सत्यमेव अस्ति। विद्यारत्नं खलु अमूल्यमस्ति।पुरा भारतवर्षे विद्याध्ययनशीला: छात्रा: सकलशास्त्रार्थतत्त्वज्ञस्य गुरो: समीपे विद्यां अधिगन्तुं गच्छन्ति स्म। तत्र च ते सदाचरणेन,तपसा,गुरुशुश्रूषया विद्यां गृह्णन्ति स्म। कथितम् अस्ति यत्-

**गुरुशुश्रूषया विद्या**

गुरुशुश्रूषया जन: सर्वं ज्ञानं प्राप्तुं शक्नोति। यं प्रति गुरो: कृपा भवति तं सर्वे स्निह्यन्ति।यथोक्तं-

**गुरुशुश्रूषया त्वेवं ब्रह्मलोकं महीयते।**

निरुक्ते आचार्यस्य निरुक्तिरेव कृतास्ति-

**आचार्य: कस्मात्? आचार्य आचारं ग्राहयति।**

**आचिनोत्यर्थान्। आचिनोति बुद्धिमिति वा।।**

अथर्ववेदे अपि उक्तम् अस्ति-

**आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते।**

गुरूणां हृदयं कमलमिव निर्मलं च भवति।गुरोरुपदेशामृतं तु तत्र नलिनमिव पल्लवितं पुष्पितं भवति। ये गुरव: शिष्यं साधु न उपदिशन्ति, ते अत्र निन्दिता: मता:। गोस्वामी तुलसीदासमहोदया: कथयन्ति-

**हरहि शिष्यधन शोक न हरई ।**

**सो गुरु घोर नरक महं परई।।**

गुरो: कृपालवेनैव जन: दुर्लभम् अपि पदार्थं प्राप्तुं शक्नोति। अतएव गुरव: सादरं वन्दनीया: सन्ति।

**अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।**

**तत्पदं दर्शितं येन तस्मै श्री गुरवे नम:।**

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**

**चक्षुरुन्मीलितं येन, तस्मै श्री गुरवे नम:।।**

# बालरचना:



# अस्माकं देशः

अस्माकं देशस्य नाम भारतः अस्ति। हिमालयः अस्य प्रहरी अस्ति।सागरः अस्य चरणाभ्याम् सह तिष्ठति। एषा भूमिः विविध रत्नानां जननी अस्ति।अस्य संस्कृतिः धर्मपरम्परा च श्रेष्ठा अस्ति। अत्र अनेक धर्मानाम् जनाः वसन्ति। अत्र जनाः अनेकां भाषायाम् अपि प्रयोगः कुर्वन्ति। अनेकाः पवित्रतमाः नद्यः अस्य भूमेः शोभा वर्धयन्ति। गंगा, गोदावरी, कृष्णा ,सरस्वती इति प्रमुखनद्याः अत्र वहन्ति। भारतवर्षः संपूर्ण विश्वे विख्यातः अस्ति।भारतवर्षे विश्वस्य आदिमम् सभ्यता अस्ति।अयं देशः विश्वे प्रकृतये अपि विख्यातः अस्ति। अस्माकं देशः दर्शनीयः अस्ति। अत्र जनाः पर्यटनाय भ्रमणार्थं कृते अपि आगच्छन्ति। अस्माकं देशः विश्वस्य शक्तिशाली देशेषु एकः अस्ति।मम जननी भारतमाता अस्ति , एतदर्थं अहं आत्मानं अतिभाग्यशालिः अनुभवामि।

-अनन्या कुमारी, 9C

# मम ग्रामः



भारतवर्षः गामप्रधानः देशः अस्ति। अधिकांशजनाः ग्रामेषु एव निवसन्ति। ग्रामीणानां दिनचर्या शोभना शिक्षाप्रदा च भवति। ग्रामेषु ग्रामीणाः जनाः प्रातः चतुर्वादने उतिष्ठन्ति। ग्रामेषु स्वच्छः वायुः प्रवहति। ग्रामेषु शुद्धं जलं, स्वच्छः वायुः, शुद्धं दुग्धम्, शुद्धं घृतम्, शुद्धाः खाद्यवस्तुनि च प्राप्यं भवन्ति। ग्रामेषु जीवनं अति सुंदरम् भवति।

**- अनिशा मंडल, 9 E**

# पर्यावरणं



पर्यावरणे शब्दद्वयम् अस्ति- परि+आवरणम्। पर्यावरणे वायुः,जलम्, अग्निः,आकाशः इत्यादयः च सन्ति। पर्यावरणस्य रक्षा सर्वेषां परं कर्तव्यं अस्ति। यस्मिन् स्थाने पर्यावरणं शुद्धं भवति तस्मिन् स्थाने जीवनं अपि सुखमयम् भवति। अतः पर्यावरणस्य रक्षा आवश्यकी वर्तते। अद्य जलस्य शुद्धिकरणस्य महती आवश्कता अस्ति। अधुना वायुः शुद्धं नास्ति। प्रदुषित पर्यावरणे विविधाः रोगाः जायन्ते। पर्यावरणरक्षायै वृक्षाः रोपणीयाः। वृक्षाः केवलं सौन्दर्याय नास्ति। वृक्षाः शुद्धं वायुं प्रसारयन्ति। वायुप्रदूषणस्य एकं प्रमुखंकारणमं यानस्य धूमं अपि अस्ति। जलं, वायुः आदयः इति प्राकतिकतत्वं प्रदुषितं अभवन्। प्रदूषणस्य अनेकानि कारणानि भवन्ति। अस्य जनसंख्या वृद्धिः मुख्यतमं कारणम् अस्ति। जूनमासस्य पन्चतमे दिवसे वयं विश्वपर्यावरण दिवसस्य आयोजनं कुर्मः। अतः पर्यावरणस्य जीवने अति महत्वपूर्णः स्थानं वर्तते।

**-निमिषा मिश्रा, 9C**

# अनुशासनम्

अस्माकं जीवने अनुशासनस्य अतीवमहत्वम् अस्ति।

सुचारू रुपेण नियमानां पालनं अनुशासनम् कथ्यते।

विशेषतः विद्यार्थी जीवने अनुशासनम् अत्यावशकम्।

यदि छात्राः जीवने अनुशासनस्य पालनं कुर्वन्ति तर्हि जीवनस्य प्रत्येकक्षेत्रे निश्चयेन सम्यक् फलं प्राप्स्यन्ति ।

अस्मभ्यं सर्वदा गृहे, विद्यालये, कार्यालये अर्थात् सर्वेषु क्षेत्रेषु अनुशासनम् पालनीयम्। यस्मिन् गृहे अनुशासनस्य पालनं न भवति तत्र कदापि शान्तिः न आगच्छति। समाजस्य कल्याणाय अपि अनुशासनम् अतिआवश्यकम्। अनुशासनहीनाः मानवः पशुतुल्यः सन्ति।

-श्रीमयी, 9F

# वृक्षं विना जीवनं न

वृक्षा: मानवजीवने महत्वपूर्णाः सन्ति। वृक्षाः अति लाभदायकः सन्ति। वृक्षस्य स्वभाव सज्जन व्यक्ति इव अस्ति। वृक्षा: अस्माकम् वातावरणम् शुद्धं कुर्वन्ति। वृक्षः अस्माकम् बहुनि वस्तुनि ददाति यथा- फलम् , छाया आदि। वृक्षः अस्माकम् उपरि बहवः उपकारम् करोति। वृक्षाः बहवः रोगाणाम् उपचारम् कुर्वन्ति। बहवः जनाः तेषाम् जीवन जीवीकाम् वृक्षाणाम् द्वारा चलयन्ति। वृक्षाः अस्माभ्यम् अति मूल्यवानम् सन्ति।



-सुहानी सिंह, 7 A

# संस्कृत भाषायाः महत्वम्

संस्कृत भाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा अस्ति। इयमेव भाषा सर्वासाम् भारतीयभाषाणाम् जननी अस्ति।

इयम् भाषा अस्माकम् अमूल्यं निधिः एव। इयम् भाषा अतीव रमणीया मधुरा च अस्ति। सा न कठिनाम् , अपितु सरला सरसा एव। पुरा इयम् भाषा व्यावहारिकी भाषा आसीत्। अद्यपि आंध्रप्रदेशे एकस्मिन् ग्रामे जनाः संस्कृत भाषामेव वार्तालापं कुर्वन्ति।

संस्कृतभाषैव भारतस्य प्राणभूता भाषा अस्ति। अस्याम् भाषायाम् विपुलं साहित्यं वर्तते। चत्वारो वेदाः, उपनिषदाः संस्कृतभाषामेव सन्ति। जनाः वेदान् न केवलम् अस्माकम् समस्तपि प्राचीनम् साहित्यम् यथा - रामायणम् , महाभारतम् , पुराणानि , स्मृतिग्रंथाः, काव्यानि, नाटकानि इत्यादि अस्यामेव भाषायाम् अस्ति। महाकवेः कालिदासस्य साहित्यम् विदेशअपि सुविख्यातम् । संस्कृता परिष्कृता शुद्धमर्थाद् व्याकरणसम्बन्धिदोषरहिता भाषा निगद्यते। अस्याः व्याकरणम् संर्वांग परिपूर्णमस्ति। संस्कृतभाषायाम् एकस्य शब्दस्य अनेके पर्यायशब्दाः सन्ति। अतः इयम् भाषा सम्पन्ना अस्ति। संस्कृतभाषायाः विपुलम् गौरवम् स्वमेव सिद्द्यति।

- खुशी किरण, 8A





अद्दजा दास, 9E



आकृत झा, 9A




अनुष्का, 7B



आदित्य चौधरी, 6A



आदित्य चौधरी, 6A

# बालप्रमोदिनी

# शब्दज्ञानम्



शिरस्त्राणम्



अङ्गुलीयकम्



उपनेत्रम्



युतकम्



शाटिका



वेष्टिः



करवस्त्रम्



पादत्राणम्



पादरक्षा



नुपूरम्



उरुकम्



कटिपट्टः



कण्ठहारः



ताटङ्कः



कङ्कणम्

# वर्णज्ञानम्



# क्रियापदज्ञानम्



नमति



हसति



पश्यति



धावति



क्रीडति



खादति



पिबति



लिखति



शेते



# गृहस्यवस्तूनि


व्यजनम्
चित्रम्
दीपकः
वस्त्रम्
कपाटिका
दर्पणः
द्वारम्
अग्निः
पुस्तकम्
कन्दुकम्
पादत्राणम्
भूषणम्
लेखनी
चमसः
घटिका
घटः



शरीराङ्गानि BODY PART
अंगुष्ठ:
THUMB
मस्तकम्
HEAD
ललाटम्
FORHEAD
नयनम्
EYE
कर:
HAND
नासिका
NOSE
मुखम्
MOUTH
केश:
HAIR
ग्रीवा
NECK
कफोणि:
ELBOW
स्कन्ध:
SHOULDER
भुजा
ARM
वक्ष:
BREAST
मणिबन्ध:
WRIST
अंगुलय:
FINGERS
उदरम्
SLOMACH
जानु:
KNEE
नितम्ब:
BOTTOM
ऊरु:
THIGH
पाद:
LEG
पादाङ्गुष्ठ:
TOE
घुटिका
ANKLE
पीठिका
CALF
चरण:
FOOT
पादतलम्
SOLE
पार्ष्णि:
HEEL

# भारतीयसंस्कारा



गर्भाधान



पुंसवन



सीमन्नतोनयन



जातकर्म



नामकरण



निष्क्रमण



अन्नप्राशन



चूड़ाकर्म



विद्यारंभ



कर्णवेध



यज्ञोपवीत



वेदारंभ



केशांत



समावर्तन



विवाह



अन्त्येष्टि

# कुतुककुटी



# परसरणम्(Osmosis)




**महाभारतशांतिपर्वे (अध्याय:१८४,श्लोक: १६)** OSMOSIS **इति उपरि वर्णनं अस्ति**

**वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत्।**
**तथा पवनसंयुक्त: पादै: पिबति पादप:॥**
**तेन तज्जलर्मादत्तं जरयेदग्निमारुतौ।**
**आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते॥**

OSMOSIS इति प्रक्रियाया: ज्ञानं अभवत्-

| | | | |
|---|---|---|---|
| भारते | = | 30 सेंचुरी | B.C.E |
| विदेशे | = | 20 सेंचुरी | C.E |

# प्रकाशस्य गतिः

ऋक्संहितायां(१.५०.४) **"SPEED OF LIGHT"** इत्युक्ते प्रकाशस्यगति विषये वर्णनं अस्ति–

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।
विश्वमा भासि रोचनम्।।

सायणाचार्यः भाष्यं लिखति यत् ––

तथा च स्मर्यते योजनानां सहस्रं द्वे द्वे शते द्वे च योजते।
एकेन निमिषार्धेन क्रममाण नमो स्तु ते ।।

ऋग्वेदसंहितासायणभाष्यनुसारेण
प्रकाशस्य **velocity** = 2,202 योजनः
**i.e.=8.75 sec.**
चिन्तयन्तु विना गैजेट कथं ते सटिकविश्लेषणं कृतवन्तः।



# मार्गम् दर्शयतु





आदित्य चक्रवर्ती, 10A

# चित्रावली



# मुख्यस्वामी श्रीमान् स्वरूपानंदस्य आगमनस्य चित्राणि














# संस्कृतप्रदर्शन्या: चित्राणि














# पूर्वकार्यक्रमस्य चित्राणि



# संस्कृतविषये उत्कृष्टः अङ्कार्जकानां छात्राणां सूची

## सत्रम् - २०१९-२०

| क्र.सं. | नाम | कक्षा | प्रतिशतः |
| --- | --- | --- | --- |
| १. | अन्वि आनंदः | 5F | ८६.६६% (86.66%) |
| २. | ईशिता दूबे | 6D | ८६.३३% (86.33%) |
| ३. | निर्भिक सिंह राठौरः | 7E | ८६.३३% (86.33%) |
| ४. | निमिषा मिश्रा | 8D | ८५.३३% (85.33%) |
| ५. | अपर्णा राजः | 9F | ७९.६६% (79.66%) |
| ६. | ऋतिषा रंजनः | 10D | ८०.६६% (80.66%) |

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

Without rigorous efforts nothing can be accomplished. Just like a deer does not enter a lion's mouth on its own without him going for a hunt.

"सर्वेषाम् उज्ज्वलभविष्यकृते हार्दाः शुभाशयाः"


चिन्मय
निर्झरिणी
अग्रिमा प्रति कृते अधोलिखितअणुसङ्केतस्य उपरि
स्वरचनां प्रेषयन्तु
अणुसङ्केतम्- cvsanskritemagazine@gmail.com